# Minakshi Ashtakam 2

# મીનાક્ષ્યષ્ટકમ્ ૨

## Document Information

Text title : Minakshi Ashtakam 2

File name : mInAkShyaShTakam2.itx

Category : devii, devI, aShTaka, mInAkShI

Location : doc_devii

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# Minakshi Ashtakam 2

## મીનાક્ષ્યષ્ટકમ્ ૨

સામીનશ્રીરઞ્જિતપઙ્કેરુહ કાન્તેર્નામી યસ્યાઃ પાદસરોજદ્વિતયસ્ય ।
કમી નાક્ષીણાશુભવૃત્તિર્લભતે તાં સા મીનાક્ષી પાતુ સમીકૃત્ય મમાગઃ ॥ ૧॥

અવ્યાદવ્યાપાદરતધ્યેયપદાબ્જા દિવ્યા દિવ્યાપન્નિચયાન્મામપચેયાત્ ।
સ્તવ્યા ભવ્યાપાદનશીલા નિગમાન્તૈરવ્યાહારવ્યાપૃતિભૂમીનદૃગીશા ॥ ૨॥

વિદ્યુલ્લેખાવિભ્રમવિશ્રાણનદીક્ષાબદ્ધોત્સાહશ્રીપરિરબ્ધાઙ્ગલતાયાઃ ।
મુગ્ધાકારસ્મેરમુખેન્દોર્ગિરિજાયાઃ કિઞ્ચિન્મે નિષ્કિઞ્ચનગમ્યં પ્રતિભાતિ ॥ ૩॥

પાણૌ વીણામાદધતી કીરકિશોરધ્વાનધ્યાતઃ સ્વઞ્ચિતતન્ત્રીધ્વનિભેદમ્ ।
લાવણ્યાબ્ધિર્લક્ષિતકારુણ્યકટાક્ષા શ્યામા કામં મીનદૃગમ્બા પરિપાતુ ॥ ૪॥

કામારામોદ્દામકટાક્ષોત્કલિકાભિઃ ક્ષેમક્ષામક્ષાલનદક્ષા સુજનાનામ્ ।
દેવી વાચામાચરણાન્તાદનવદ્યા ભાયાદન્તસ્સન્તતમમ્બા શફરાક્ષી ॥ ૫॥

ચારુસ્મેરામ્ભોરુહકિઞ્જલ્કસરૂપામાપાદાગ્રાદઞ્ચિતભૂષામુષિતાઙ્ગીમ્ ।
માલાપાશૌ પુસ્તકચાપૌ ચ દધાનાં મીનાક્ષીં તાં ચેતસિ બાલાં કલયામિ ॥ ૬॥

વેણીમૂલામુક્તનિશાનાથવતંસા ફાલોન્મીલલ્લોચનસઙ્ઘર્ષિલલામા ।
કીરાલાપધ્માપિતમન્દસ્મિતવક્ત્રા મીનાક્ષી નશ્ચેતસિ નિત્યં પ્રતિભાયાત્ ॥ ૭॥

અમ્બાકારાઃ સન્તુ સહસ્રં સુરવન્દ્યાઃ કિઞ્ચાલમ્બે કામપિ મૂર્તિં કમનીયામ્ ।
લીલાકીરાલઙ્કૃત પાણિં લલિતાઙ્ગીં લોલાપાઙ્ગાં મીનદૃગાખ્યાં શિવપત્નીમ્ ॥ ૮॥

પ્રાતઃકાલે જલ્પતિ યો ના નિયતાત્મા સ્મૃત્વા દેવીમષ્ટકમિષ્ટાર્થદમેતત્ ।
તસ્ય પ્રીતા સમ્પદમુચ્ચૈરપિ વાચં દદ્યાદદ્યાલોકસવિત્રી શફરાક્ષી ॥ ૯॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
કૃષ્ણાનન્દસરસ્વત્યા શ્રીમીનાક્ષ્યષ્ટકં કૃતમ્ ।

ઇતિ કૃષ્ણાનન્દકૃતિષુ મીનાક્ષ્યષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Rajesh Thyagarajan

*Minakshi Ashtakam 2*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*